# श्री मयूरेश स्तोत्रं
# (श्री आधी व्याधि गणेश स्तोत्रं)

## ब्रह्मोवाच

पुराणपुरुषं देवं नानाक्रीडाकरं मुदा | मायाविनं दुर्विभाव्यं मयूरेशं नमाम्यहम् || १ ||
परात्परं चिदानन्दं निर्विकारं हृदि स्थितम् | गुणातीतं गुणमयं मयूरेशं नमाम्यहम् || २ ||

सृजन्तं पालयन्तं च संहरन्तं निजेच्छया | सर्वविघ्नहरं देवं मयूरेशं नमाम्यहम् || ३ ||
नानादैत्यनिहन्तारं नानारूपाणि बिभ्रतम् | नानायुध धरं भक्त्या मयूरेशं नमाम्यहम् || ४ ||

इन्द्रादि देवता वृन्दै रभिष्टुत महर्निशम् | सदसद्वयक्त मव्यक्तं मयूरेशं नमाम्यहम् || ५ ||
सर्व शक्तिमयं देवं सर्वरूपधरं विभुम् | सर्व विद्याप्रवक्तारं मयूरेशं नमाम्यहम् || ६ ||

पार्वतीनन्दनं शम्भोरानन्द परिवर्धनम् | भक्तानन्दकरं नित्यं मयूरेशं नमाम्यहम् || ७ ||
मुनिध्येयं मुनिनुतं मुनिकामप्रपूरकम् | समाष्टिव्यष्टिरूपं त्वां मयूरेशं नमाम्यहम् || ८ ||

सर्वाज्ञाननिहन्तारं सर्वज्ञानकरं शुचिम् | सत्यज्ञानमयं सत्यं मयूरेशं नमाम्यहम् || ९ ||
अनेक कोटि ब्रह्माण्ड नायकं जगदीश्वरम् | अनन्त विभवं विष्णुं मयूरेशं नमाम्यहम् || १० ||

## मयूरेश उवाच

इदं ब्रह्मकरं स्तोत्रं सर्वपाप प्रनाशनम् | सर्व कामप्रदं नृणां सर्वोपद्रव नाशनम् || ११ ||
कारागृह गतानां च मोचनं दिनसप्तकात् | आधिव्याधि हरं चैव भुक्तिमुक्ति प्रदं शुभम् || १२ ||

**|| इति श्री मयूरेश स्तोत्रं सम्पूर्णं ||**



With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133



www.viswakalyanam.org